श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# नावल्पाक्कम् रामानुज श्रीधर दास कृता
# तिरुमलै चतुर्वेद शतक्रतु नावल्पाक्कम् शठकोप रामानुज तातयार्यमहादेशिक सार्वभौम मङ्गलपञ्चदशी

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Sri. Sundar Varadarajan of Chennai for proofreading this text.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ तिरुमलै चतुर्वेद शतक्रतु नावल्पाक्कम् शठकोप रामानुज तातयार्यमहादेशिक सार्वभौम मङ्गलपञ्चदशी ॥

श्रीशैलाभिजनाम्बुराशिशशिनं श्रीकृष्णतातात्मजं
श्रीशैलान्वयदेवनाथसुधियः प्राप्तागमान्तद्वयम्।
पादाब्जे नरसिंहतातयगुरोर्न्यस्तात्मरक्षाभरं
विद्वद्बृन्दचकोरचन्दिरमहं रामानुजार्यं श्रये॥

श्रीरामानुजसिद्धान्तस्थापकाय सदात्मने।
मङ्गलं रामानुजाय मायिध्वान्तविवस्वते॥ १ ॥

श्रीफाल्गुने मास्यार्द्रायामवतीर्णाय सूरये।
श्रीमच्छ्रीकृष्णतातार्यतनूजायास्तु मङ्गलम्॥ २ ॥

श्रीजम्बूपुरभाग्याय सुसत्वगुणराशये।
शतक्रतुकुलश्रीरामानुजायास्तु मङ्गलम्॥ ३ ॥

अक्षराभ्यासं यो बाल्ये तातदेशिकसन्निधेः।
अवाप्य वृद्धिं गमितः तस्मै प्राज्ञाय मङ्गलम्॥ ४ ॥

श्रीमन्नृसिंहतातार्याल्लब्धमन्त्रतपस्विने।
तत्पादाब्जभ्रमराय लक्ष्मणार्याय मङ्गलम्॥ ५ ॥

स्वतातसन्निधिप्राप्तनव्यन्यायादिसिन्धवे।
रामानुजतातयार्यदेशिकायास्तु मङ्गलम्॥ ६ ॥

देवनाथतातप्राप्तोभयवेदान्तसंपदे।
रामानुजतातयार्यदेशिकायास्तु मङ्गलम्॥ ७ ॥

www.prapatti.com

जैमिनेरवतारो वा गौतमांशोऽथवा भवेत्।
व्यासो वा पाणिनिर्वेति वितर्क्यायास्तु मङ्गलम्॥ ८ ॥

डम्भासूयारहिताय भव्यलक्षणमूर्तये।
रामानुजतातयार्य देशिकायास्तु मङ्गलम्॥ ९ ॥

सर्वदर्शनसारौघसुरभीकृतमानसे।
वेदान्तदेशिकप्रोक्तरहस्यज्ञाय मङ्गलम्॥ १० ॥

श्रीदेशिककृतशतदूषणी परिरक्षिता।
येन रामानुजार्येण तस्मै श्रेष्ठाय मङ्गलम्॥ ११ ॥

वैराग्यक्षान्त्यनुष्ठानज्ञानादिगुणभूमये।
रामानुजतातयार्य देशिकायास्तु मङ्गलम्॥ १२ ॥

वेदान्ताध्यापने नित्यं निरताय महात्मने।
रामानुजतातयार्य देशिकायास्तु मङ्गलम्॥ १३ ॥

निजाश्रितानां शिष्याणां निवासश्शरणं सहृत्।
योऽस्ति सान्दीपिनिरिव तस्मै धीराय मङ्गलम्॥ १४ ॥

कठिनग्रन्थजातस्य व्याख्यानकरणे रतः।
यो रामानुजतातार्यः तस्मै सेव्याय मङ्गलम्॥ १५ ॥

यः कृतं श्रीधरार्येण श्रीरामानुजमङ्गलम्।
आशास्ते स प्रतिदिनं लभेतामितमङ्गलम्॥ १६ ॥

॥ इति मङ्गलपञ्चदशी संपूर्णा ॥

www.prapatti.com